# Shri Shiva Vedapadastava or Shiva Vedapadastotram

# श्रीशिववेदपादस्तोत्रम् अथवा श्रीशिववेदपादस्तवः

## Document Information

Text title : shivavedapAdastotram or shivavedapAdastavaH

File name : shivavedapAdastotram.itx

Category : shiva, vedapAda

Location : doc_shiva

Transliterated by : Rajnarayanan

Proofread by : Rajnarayanan C K, Aruna Narayanan

Acknowledge-Permission: Sadyojata Manasa Mandiram, Kotatattupadukerekota, karNATaka, Sharada

Latest update : September 19, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# श्रीशिववेदपादस्तोत्रम् अथवा श्रीशिववेदपादस्तवः

श्रीजैमिनिमहर्षिणा प्रणीतो
॥ अथ श्रीवेदपादस्तोत्रप्रारम्भः ॥

(॥ अथ वेदपादस्तवप्रारम्भः ॥)
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १॥

कुण्डलीकृतनागेन्द्रं खण्डेन्दुकृतशेखरम् ।
पिण्डीकृतमहाविघ्नं ढुण्डिराजं नमाम्यहम् ॥ २॥

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरिवारणम् ॥ ३॥

ऋषय ऊचुः -
पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।
किं चकार महायोगी नूतनो वक्तुमर्हसि ॥ १॥

सूत उवाच -
भगवान् जैमिनिर्धीमान्पुण्डरीकपुरे पुरा ।
महर्षिसिद्धगन्धर्वयक्षकिन्नरसेविते ॥ २॥

नृत्यद्भिरप्सरस्सङ्घैर्दिव्यगानैश्च शोभिते ।
नृत्यन्तं परमीशानं ददर्श सदसि प्रभुम् ॥ ३॥

ननाम दूरतो दृष्ट्वा दण्डवत्क्षितिमण्डले ।
वपावुत्थाय देवस्य ताण्डवामृतमङ्गलम् ॥ ४॥ (पपा?वुत्थाय, ताण्डवाऽमृतमागलम्)

पार्श्वस्थितां महादेवीं पश्यन्तीं तस्य ताण्डवम् ।
दृष्ट्वा सुसंहृष्टमनाः पपात पुरतो मुनिः ॥ ५॥

ततश्शिष्यास्समाहूय वेदशास्त्रार्थपारगान् । (सर्वशास्त्रार्थ)

अग्निकेशमकेशं च सतयोगं च माधवम् ॥ ६॥ (शतयागं जटाधरम्)
वक्रनासं समित्पाणिं धूमगन्धिं कुशासनम् ।
एतैस्सार्थं महादेवं पूजयामास जैमिनिः ॥ ७॥ (एतैस्सार्धम्)
ततोऽपि वेदवेदान्तसारार्थं तत्प्रसादतः ।
कृताञ्जलिरुवाचेदं वेदान्तस्तवमुत्तमम् ॥ ८॥

श्रीजैमिनिरुवाच -
ॐ विघ्नेशविधिमार्ताण्डचन्द्रेन्द्रोपेन्द्रवन्दित ।
नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते ॥ १॥ ऋ. २.६.२९
उमाकोमलहस्ताब्जसम्भावितललाटिकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥ २॥ य. ३४.१
शिवं विष्णोश्च दुर्दर्शं नरः कस्स्तोतुमर्हति ।
तस्मान्मत्तस्स्तुतिस्सेयमभ्राद्वृष्टिरिवाजनि ॥ ३॥ ऋ. ५.६.१७
नमः शिवाय साम्बाय नमः शर्वाय शम्भवे ।
नमो नटाय रुद्राय सदसस्पतये नमः ॥ ४॥ य. ३.२.४.४
पादभिन्नाहिलोकाय मौलिभिन्नाण्डभित्तये ।
भुजभ्रान्तदिगन्ताय भूतानां पतये नमः ॥ ५॥ य. ११.२.१९
क्वणन्नूपुरयुग्माय विलसत्कृत्तिवाससे ।
फणीन्द्रमेखलायास्तु पशूनां पतये नमः ॥ ६॥ य. ४.५.२.१
कालकालाय सोमाय योगिने शूलपाणये ।
अस्थिभूषाय शुद्धाय जगतां पतये नमः ॥ ७॥ य. ४.५.२.१
पात्रे सर्वस्य जगतो नेत्रे सर्वदिवौकसाम् ।
गोत्राणां पतये तुभ्यं क्षेत्राणां पतये नमः ॥ ८॥ य. ४.५.२.१
शङ्कराय नमस्तुभ्यं मङ्गलाय नमोऽस्तु ते ।
धनानां पतये तुभ्यमन्नानां पतये नमः ॥ ९॥ य. ४.५.२.१
अष्टाङ्गयोगहृष्टाय क्लिष्टभक्तेष्टदायिने । (अष्टाङ्गायातिहृष्टाय)
इष्टिघ्नास्तुतयूष्टाय पुष्टानां पतये नमः ॥ १०॥ य. ४.५.२.१ (इष्टिघ्नायेष्टितुष्टाय)
पञ्चभूताधिपतये कालाधिपतये नमः ।
नम आत्माधिपतये दिशां च पतये नमः ॥ ११॥ य. ४.५.२.१
विश्वकर्त्रे महेशाय विश्वभर्त्रे पिनाकिने ।
विश्वहर्त्रेऽग्निनेत्राय विश्वरूपाय वै नमः ॥ १२॥ य. ११.१०.१२
ईशान ते तत्पुरुष नमो घोराय ते सदा ।

वामदेव नमस्तुभ्यं सद्योजाताय वै नमः ॥ १३॥ य. ११.१०.४३ (नमस्तेऽस्तु)
भूतिभूषाय भक्तानां भीतिभङ्गरताय ते ।
नमो भवाय भर्गाय नमो रुद्राय मीढुषे ॥ १४॥ य. १०.७.८
सहस्राङ्गाय साम्बाय सहस्राधीश ते नमः । (सहस्राभीषवे नमः )
सहस्रबाहवे तुभ्यं सहस्राक्षाय मीढुषे ॥ १५॥ य। ४.५.१.३
सुकपोलाय सोमाय सुललाटाय सुश्रुवे । (सुभ्रुवे)
सुदेहाय नमस्तुभ्यं सुमृडीकाय मीढुषे ॥ १६॥ ऋ. २.१.२६
भवक्लेशनिमित्तोरुभयच्छेदकृते सताम् । (भवक्लेशनिमित्ताय भवच्छेदकृते)
नमस्तुभ्यमषाढाय सहमानाय वेधसे ॥ १७॥ ऋ. २.६.२७ (नमस्तुभ्यमषाळ्हाय)
वन्देऽहं देवमानन्दसन्दोहं लास्यसुन्दरम् ।
समस्तजगतां नाथं सदसस्पतिमद्भुतम् ॥ १८॥ ऋ. १.१.३५
सुजङ्घं सूदरं सूरुं सुकण्ठं सोमभूषणम् । (सुन्दरं सूरुं)
सुगण्डं सुदृशं वन्दे सुगन्धिं पुष्टिवर्धनम् ॥ १९॥ ऋ. ५.४.३०
भिक्षाहारं हरित्क्षौमं रक्षाभूषं क्षितिक्षमम् । (तक्षाभूषं)
यक्षेशेष्टं नमामीशमक्षरं परमं प्रभुम् ॥ २०॥ य. ११.१०.१३ (परमं पदम्)
अर्धालकमवस्त्रार्धमस्थ्युत्पलदलस्रजम् ।
अर्ध पुंलक्षणं वन्दे पुरुषं कृष्णपिङ्गलम् ॥ २१॥ य. ११.१०.१२
सकृत्प्रणतसंसारमहासागरतारकम् ।
प्रणमामि तमीशानं जगतस्तस्थुषस्पतिम् ॥ २२॥ ऋ. ५.५.१०
त्रातारं जगतामीशं दातारं सर्वसम्पदाम् । (धातारं)
नेतारं मरुतां वन्दे जेतारमपराजितम् ॥ २३॥ ऋ. ४.१.१८
तं त्वामन्तकहन्तारं वन्दे मन्दाकिनीधरम् ।
ततानि विदधे योऽयमिमानि त्रीणि विष्टपा ॥ २४॥ ऋ. ६.६.१४ (विष्टपान्)
सर्वज्ञं सर्वगं सर्वं कविं वन्दे तमीश्वरम् ।
यतश्च यजुषा सार्धमृचः सामानि जज्ञिरे ॥ २५॥ ऋ. ८.४.१८ (सार्थम्)
भवन्तं सुदृशं वन्दे भूतभव्यभवत्पतिम् । (भूतभव्यभवन्ति च)
त्यजन्तीतरकर्माणि यो विश्वाभि विपश्यति ॥ २६॥ ऋ. ८.८.४५ (विश्वा भुवि पश्यति)
हरं सुरनियन्तारं परं तमहमानतः ।
यदाज्ञया जगत्सर्वं व्याप्य नारायणः स्थितः ॥ २७॥ य. ११.१०.१३
तं नमामि महादेवं यन्नियोगादिदं जगत् ।

कल्पादौ भगवान् धाता यथापूर्वमकल्पयत् ॥ २८॥ ऋ. ८.८.४८
ईश्वरं तमहं वन्दे यस्य लिङ्गमहर्निशम् ।
यजन्ते सह भार्याभिरिन्द्रज्येष्ठा मरुद्गणाः ॥ २९॥ ऋ २.८.९
नमामि तमिमं रुद्रं यमभ्यर्च्य सकृत्पुरा ।
अवापुस्स्वं स्वमैश्वर्यं देवासः पूषरातयः ॥ ३०॥ ऋ. १.२.९
तं वन्दे देवमीशानं यं शिवं हृदयाम्बुजे ।
सततं यतयः शान्ताः सञ्ज्ञानाना उपासते ॥ ३१॥ ऋ. ८.८.४९
तदस्मै सततं कुर्मो नमः कमलकान्तये । (तदस्यै)
उमाकुचपदोरस्का या ते रुद्र शिवातनूः ॥ ३२॥ य. ४.५.१.१
नमस्ते रुद्रभावाय नमस्ते रुद्रकेलये ।
नमस्ते रुद्रशान्त्यै च नमस्ते रुद्रमन्यवे ॥ ३३॥ य. ४.५.१.१
वेदाश्वरथनिष्ठाभ्यां पादाभ्यां त्रिपुरान्तक । (क्षताश्वरथनिष्ठाभ्यां)
बाणकार्मुकयुक्ताभ्यां बाहुभ्यामुत ते नमः ॥ ३४॥ य. ४.५.१.१ (कार्मुकहस्ताभ्यां)
ईशानं सकलाराध्यं वन्दे सम्पत्समृद्धिदम् ।
यस्य चासीद्धरिः शस्त्रं ब्रह्मा भवति सारथिः ॥ ३५॥ ऋ २.३.१
नमः परशवे देव शूलायानलरोचिषे ।
हर्यग्नीन्द्रात्मने तुभ्यमुतोत इषवे नमः ॥ ३६॥ य ४.५.१.१
नमस्ते वासुकिज्याय विष्फाराय च शङ्कर । 36 37 swapped in newer text
महते मेरुरूपाय नमस्ते अस्तु धन्वने ॥ ३७॥ य ४.५.१.१
सुरेतरवधूहार हारिणी हर यानि ते ।
अन्यान्यस्त्राण्यहं तूर्णमिदं तेभ्योकरं नमः ॥ ३८॥ ऋ. ८.३.२३ (तूर्णमहं)
धराधरसुतालीला सरोजाहतबाहवे ।
तस्मै तुभ्यमवोचाम नमो अस्मां अवस्यवः ॥ ३९॥ ऋ १.८.६
रक्ष मामक्षमं क्षीणमक्षक्षतमशिक्षितम् ।
अनाथं दीनमापन्नं दरिद्रन्नीललोहित ॥ ४०॥ य. ४.५.१०.१ (दरिद्रं नीललोहित)
दुर्मुखं दुष्क्रियं दुष्टं रक्षमामीश दुर्दशम् । (मादृशं)
मादृशानामहं न त्वदन्यं विन्दामि राधसे ॥ ४१॥ ऋ. ६.२.१७ (रायसे)
भवाख्येनाग्निना शम्भो रागद्वेषमदार्चिषा ।
दयालो दह्यमानानामस्माकमविता भव ॥ ४२॥ ऋ. २.५.६
परदारं परावासं परवस्त्रं पराप्रियम् ।
हर पाहि परान्नं मां पुरुनामन् पुरुष्टुत ॥ ४३॥ ऋ. ६.६.२४

लौकिकैर्यत्कृतं पुष्टैर्नावमानं सहामहे ।
देवेश तव दासेभ्यो भूरिदा भूरिदेहिनः ॥ ४४॥ ऋ. ३.६.३० (दानेभ्यो)
लोकानामुपपन्नानां गर्विणामीश पश्यताम् ।
अस्मभ्यं क्षेत्रमायुश्च वसुस्स्पार्हं तदाभर ॥ ४५॥ ऋ. ६.३.४९ (वसुस्स्पार्हं तथा भर)
याञ्चादौ महतीं लज्जामस्मदीयां घृणानिधे ।
त्वमेव वेत्सि नस्तूर्णमिषं स्तोतृभ्य आभर ॥ ४६॥ ऋ. ३.८.२२ (नस्तूर्णमिवग)
जाया माता पिता चान्ये मां द्विषन्त्यमतिं कृशम् ।
देहि मे महतीं विद्यां राया विश्वपुषा सह ॥ ४७॥ ऋ. ६.२.२७ (विद्यां राधा)
अदृष्टार्थेषु सर्वेषु दृष्टार्थेष्वपि कर्मसु ।
मेरुधन्वन्नशक्तेभ्यो बलं धेहि तनूषु नः ॥ ४८॥ ऋ. ३.३.२२
लब्धानिष्टसहस्रस्य नित्यमिष्टवियोगिनः । (लब्धारिषसहस्रस्य)
हृद्रोगं मम देवेश हरिमाणं च नाशय ॥ ४९॥ ऋ. १.४.८
ये ये रोगाः पिशाचा वा नरा देवाश्च मामिह ।
बाधन्ते देव तान् सर्वान् निबाधस्व महाँ असि ॥ ५०॥ ऋ. ६.४.४४ (महानसि)
त्वमेव रक्षितास्माकं नान्यः कश्चन विद्यते ।
तस्मात्स्वीकृत्य देवेश रक्षाणो ब्रह्मणस्पते ॥ ५१॥ ऋ. १.१.३४
त्वमेवोमापते माता त्वं पिता त्वं पितामहः ।
त्वमायुस्त्वं मतिस्त्वं श्रीरुत भ्रातोत नः सखा ॥ ५२॥ ऋ. ८.८.४४ (भ्रातोतमस्सखा)
यतस्त्वमेव देवेश कर्ता सर्वस्य कर्मणः ।
ततः क्षमस्व तत्सर्वं यन्मया दुष्कृतं कृतम् ॥ ५३॥ य. ११.१०.१
त्वत्समो न प्रभुत्वेन फल्गुत्वेन च मत्समः ।
अतो देव महादेव त्वमस्माकं तवस्मसि ॥ ५४॥ ऋ. ६.६.२० (तवस्तसि)
सुस्मितं भस्मगौराङ्गं तरुणादित्यविग्रहम् । (सुस्थितं)
प्रसन्नवदनं सौम्यं गायेद्वा मनसा गिरा ॥ ५५॥ ऋ. ६.४.४ (नमसा, मनसा)
एष एव वरोस्माकं नृत्यन्तन्त्वां सभापते ।
(एष एवतु सोऽस्माकं नृत्यन्तं त्वावभासते ।)
लोकयन्तमुमाकान्तं पश्येम शरदः शतम् ॥ ५६॥ ऋ. ५.५.११
अरोगिणो महाभागा विद्वांसश्च बहुश्रुताः ।
भवन्ति त्वत्प्रसादेन जीवेम शरदः शतम् ॥ ५७॥ ऋ. ५.५.११ (भगवन् त्वत्प्रसादेन)

सदा च बन्धुभिस्सार्धं त्वदीयं ताण्डवामृतम् । (बन्धुभिस्सार्थं)
(पिबतः काममीशानं ददाम शरदः शतम् ॥)
पिबन्तः काममीशान नन्दाम शरदः शतम् ॥ ५८॥ य. ११.४.४२
देवदेव महादेव त्वदीयाङ्घ्रिसरोरुहम् ।
कामं मधुमयं पीत्वा मोदाम शरदः शतम् ॥ ५९॥ य. ११.४.४२
कीटा नागाः पिशाचा वा ये वा के वा भवे भवे ।
तव दासा महादेव भवाम शरदः शतम् ॥ ६०॥ य. ११.४.४२
सभायामीश ते दिव्यं नृत्यवाद्यकलस्वनम् । (नृत्तवाद्य)
श्रवणाभ्यां महादेव शृणवाम शरदः शतम् ॥ ६१॥ य. ११.४.४२
स्मृतिमात्रेण संसारविनाशनकराणि ते ।
नामानि तव दिव्यानि प्रब्रवाम शरदः शतम् ॥ ६२॥ य. ११.४.४२
इषुसन्धानमात्रेण दग्धत्रिपुर धूर्जटे ।
आधिभिर्व्याधिभिर्नित्यमजीतास्स्याम शरदः शतम् ॥ ६३॥ य. ११.४.४२
चारुचामीकराभासं गौरीकुचपदोरसम् ।
कदानु लोकयिष्यामि युवानं विश्पतिं कविम् ॥ ६४॥ ऋ. ६.३.१४(
कदानुलोपयिष्यामि, विश्रुतं कविम्)
प्रमथेन्द्रावृतं प्रीतवदनं प्रियभाषिणम् ।
सेविष्येऽहं कदा साम्ब सुभासं शुक्रशोचिषम् ॥ ६५॥ ऋ. ६.२.१२ (साम्बं)
बह्वेनसं मामकृतपुण्यलेशं च दुर्मतिम् ।
स्वीकरिष्यति किन्त्वीशो नीलग्रीवो विलोहितः ॥ ६६॥ य. ४.५.१
कालशूलानलासक्तभीतिव्याकुलमानसम् । (कालशूरानलासक्त)
(कदानु रक्ष्यतीशो मां तु सुग्रीवो अवानतः ॥)
कदा नु द्रक्ष्यतीशो मां तुविग्रीवो अनानतः ॥ ६७॥ ऋ. ६.४.४५
गायका यूयमायात यदि रायादिलिप्सवः ।
धनदस्य सखेशोयमुपास्मै गायता नरः ॥ ६८॥ ऋ. ६.७.३६ (सखेसायमुपास्मै)
आगच्छत सखायो मे यदि यूयं मुमुक्षवः ।
स्तुतेशमेवं मुक्त्यर्थमेषविप्रैरभिष्टुतः ॥ ६९॥ ऋ. ६.७.२१ (स्तुतेशमेनं)
पदे पदे पदे देवपदं नः सेत्स्यति ध्रुवम् । (स्नेह्यति)
प्रदक्षिणं प्रकुरुतमध्यक्षं धर्मणामिमम् ॥ ७०॥ ऋ. ६.३.३३ (प्रकुर्वीतमध्यक्षं)
सर्वं कार्यं युवाभ्यां हि सुकृतं सुहृदौ मम ।
अञ्जलिं कुरुतं हस्तौ रुद्राय स्थिरधन्विने ॥ ७१॥ य. १०.८.८

मन्मूर्धन् मरुतामूर्ध्वं भवं चन्द्रार्धमूर्धजम् । (यन्मूर्धं)
मूर्धघ्नं च चतुर्मूर्ध्नो नमस्या कल्मलीकिनम् ॥ ७२॥ ऋ. २.७.१७ (मरुतामूर्ध्वं कल्मनीकिनम्)
नयने नयनोद्भूतदहनालीढमन्मथम् । (दमना)
पश्यन्तं तरुणं सौम्यं भ्राजमानं हिरण्मयम् ॥ ७३॥ ऋ. ६.७.२५
सभायां शूलिनस्सन्ध्यानृत्तवाद्यस्वनामृतम् ।
कर्णौ तूर्णं यथाकामं पातं गौरा विवेरिणे ॥ ७४॥ ऋ. ६.६.१०
नासिके वासुकिश्वासवासिताभासितोरसम् ।
घ्रायतं गरलग्रीवमस्मभ्यं शर्म यच्छतम् ॥ ७५॥ ऋ. १.१.३३
स्वस्त्यस्तु सुखिते जिह्वे विद्यादातुरुमापतेः । (सखि ते)
स्तवमुच्चतरं ब्रूहि जयतामिव दुन्दुभिः ॥ ७६॥ ऋ. १.२.२५
चेतःपोत न शोचस्त्वं निन्द्यं विन्दाखिलं जगत् ।
अस्य नृत्तामृतं शम्भोर्गौरो न तृषितः पिब ॥ ७७॥ ऋ. १.१.३०
सुगन्धिं सुखसंस्पर्शं कामदं सोमभूषणम् ।
गाढमालिङ्ग मच्चित्त योषा जारमिव प्रियम् ॥ ७८॥ ऋ. ६.८.२२
महामयूखाय महाभुजाय
महाशरीराय महाम्बराय ।
महाकिरीटाय महेश्वराय
महोमहीं सुष्टुतिमीरयामि ॥ ७९॥ ऋ. २.७.१७ (महोमहाय सुष्टुतमीरयामि)
यथा कथञ्चिद्रचिताभिरीश
प्रसादतश्चारुभिरादरेण ।
प्रपूजयामस्स्तुतिभिर्महेश
मषाढमुग्रं सहमानमाभिः ॥ ८०॥ ऋ. ४.६.४
नमश्शिवाय त्रिपुरान्तकाय
जगत्त्रयेशाय दिगम्बराय । (जगत्त्रयीशाय)
नमोऽस्तु मुख्याय हराय शम्भो (हराय भूयो)
नमो जघन्याय च बुध्नियाय च ॥ ८१॥ य. ४.५.६
नमोऽविकाराय विकारिणे ते (नमो विकाराय)
नमो भवायास्तु भवोद्भवाय ।
बहु प्रजात्यन्त विचित्ररूपा
यतः प्रसूता जगतः प्रसूती ॥ ८२॥ य. ११.१०.१

तस्मै सुरेशोरुकिरीटनाना-
रत्नावृताष्टापदविष्टराय ।
भस्माङ्गरागाय नमः परस्मै
यस्मात्परं नापरमस्ति किञ्चित् ॥ ८३॥ य. ११.१०.१२
सर्पाधिराजौषधिनाथ युद्ध-
क्षुभ्यज्जटामण्डलगह्वराय ।
तुभ्यं नमस्सुन्दरताण्डवाय
यस्मिन्निदँ सं च विचैति सर्वम् ॥ ८४॥ य. १०.१.११
मुरारिनेत्रार्चितपादपद्म-
मुमाङ्घ्रिलाक्षापरिरक्तपाणिम् । (लाक्षारससक्तपाणिम्)
नमामि देवं विषनीलकण्ठं
हिरण्यदन्तं शुचिवर्णमारात् ॥ ८५॥ ऋ. ३.६.१४
नमामि नित्यं त्रिपुरारिमेनं
यमान्तकं षण्मुखतातमीशम् ।
ललाटनेत्रार्दितपुष्पचापं
विश्वं पुराणं तमसः परस्तात् ॥ ८६॥ य. ११.१०.१
अनन्तमव्यक्तमचिन्त्यमेकं
हरन्तमाशाम्बरमम्बराङ्गम् ।
अजं पुराणं प्रणमामि योऽय-
मणोरणीयान्महतो महीयान् ॥ ८७॥ य. १०.१०.११
अन्तस्थमात्मानमजं न दृष्ट्वा
भ्रमन्ति मूढा गिरिगह्वरेषु ।
पश्चादुदक्दक्षिणतः पुरस्ता-
दधस्विदासी दुपरि स्विदासी३त् ॥ ८८॥ ऋ. ८.७.१७
इमं नमामीश्वरमिन्दुमौलिं
शिवं महानन्दमशोकदुःखम् ।
हृदम्बुजे तिष्ठति यः परात्मा
परीत्य सर्वाः प्रदिशो दिशश्च ॥ ८९॥ य. ११.१०.१
रागादिकापथ्यसमुद्भवेन
भग्नं भवाख्येन महामयेन ।
विलोक्य मां पालय चन्द्रमौले

भिषक्तमन्त्वा भिषजां शृणोमि ॥ ९०॥ ऋ. २.७.१६
दुःखाम्बुराशिं सुखलेशहीन-
मस्पृष्टपुण्यं बहुपातकं माम् ।
मृत्योः करस्थं भवसर्पभीतं (भव रक्श बीतं)
पश्चात्पुरस्तादधरादुदक्तात् ॥ ९१ ॥ ऋ. ८.४.९
गिरीन्द्रजाचारुमुखावलोक-
सुशीतया देव तवैव दृष्ट्या । (सुगीतया चारु)
वयं दयापूरितयैव तूर्ण-
मपो ननावा दुरिता तरेम ॥ ९२॥ ऋ. ५.१.१२
अपारसंसारसमुद्रमध्ये
निमग्नमुत्क्रोशमनल्परागम् ।
मामक्षयं पाहि महेश जुष्ट- (मामक्षमं)
मोजिष्ठया दक्षिणयैवरातिम् ॥ ९३॥ ऋ. २.४.८
स्मरन् पुरा सञ्चितपातकानि
खरं यमस्याभिमुखं यमारे ।
बिभेमि मे देहि यथेष्टमायु-
र्यदि क्षितायुर्यदि वा परेतः ॥ ९४॥ ऋ. ८.८.१९
सुगन्धिभिः सुन्दरभस्मगौरै- (सुगन्धगस्सुन्दर)
रनन्तभोगैर्मृदुलैरघोरैः ।
इमं कदालिङ्गति मां पिनाकी
स्थिरेभिरङ्गैः पुरुरूप उग्रः ॥ ९५॥ ऋ. २.७.१७
क्रोशन्तमीशः पतितं भवाब्धौ
नागास्यमण्डूकमिवातिभीतम् ।
कदा नु मां रक्ष्यति देवदेवो
हिरण्यरूपः सहिरण्यसन्दृक् ॥ ९६ ॥ ऋ. २.७.२३
चारुस्मितं चन्द्रकलावतंसं
गौरीकटाक्षार्हमयुग्मनेत्रम् ।
आलोकयिष्यामि कदा नु देव-
मादित्यवर्णं तमसः परस्तात् ॥ ९७॥ य. ११.३.१३.१
आगच्छतात्राशु मुमुक्षवो ये
यूयं शिवं चिन्तयतोऽन्तरब्जे । (चिन्तयतान्तरब्जे)

ध्यायन्ति मुक्त्यर्थमिमं हि नित्यं
वेदान्तविज्ञानसुनिश्चितार्थाः ॥ ९८॥ य. १०.१०.११
आयात यूयं भुवनाधिपत्य-
कामा महेशं सकृदर्चयध्वम् ।
एनं पुराभ्यर्च्य हिरण्यगर्भो
भूतस्य जातः पतिरेक आसीत् ॥ ९९॥ ऋ. ८.७.३
ये कामयन्ते विपुलां श्रियं ते
श्रीकण्ठमेनं सकृदानमन्ताम् ।
श्रीमानयं श्रीपतिवन्द्यपादः
श्रीणामुदारो धरुणो रयीणाम् ॥ १००॥ ऋ. ७.८.२८
सुपुत्रकामा अपि ये मनुष्या
युवानमेनं गिरिशं यजन्ताम् ।
यतस्स्वयम्भूर्जगतां विधाता
हिरण्यगर्भः समवर्तताग्रे ॥ १०१॥ ऋ. ८.७.३
अलं किमुक्तैर्बहुभिस्समीहितं (समीरितं)
समस्तमस्याश्रयणेन सिध्यति ।
पुरैनमाश्रित्य हि कुम्भसम्भवो
दिवा न नक्तं पलितो इवाजनि ॥ १०२॥ ऋ. २.२.१३ (दिवा न सक्तं)
अन्यत्परित्यज्य ममाक्षिभृङ्गौ (भृङ्गाः)
सर्वं सदैनं शिवमाश्रयेथाम् । (शिवमाश्रयध्वम्)
आमोदवानेष मृदुश्शिवोऽयं
स्वादुष्किलायं मधुमां उतायम् ॥ १०३॥ ऋ. ४.७.३०
भविष्यसि त्वं प्रतिमानहीनो (प्रतिमाविहीना)
विनिर्जिताऽशेषनरामरा च ।
नमोऽस्तु ते वाणि महेशमेनं
स्तुहि श्रुतं गर्तसदं युवानम् ॥ १०४॥ ऋ. २.७.१८
यद्यन्मनश्चिन्तयसि त्वमिष्टं
तत्तद्भविष्यत्यखिलं ध्रुवं ते ।
दुःखे निवृत्तेः विषये कदाचि- (निवृत्तिर्विषये)
द्यक्ष्वामहे सौमनसाय रुद्रम् ॥ १०५॥ ऋ. ४.२.१९
अज्ञानयोगादपचारकर्म

यत्पूर्वमस्माभिरनुष्ठितं ते ।
तद्देव सोढ्वा सकलं दयालो
पितेव पुत्रान्प्रति नो जुषस्व ॥ १०६॥ ऋ. ५.४.२१
संसाराख्यक्रुद्धसर्पेण तीव्रैः
रागद्वेषोन्मादलोभादिदन्तैः ।
दष्टं दृष्ट्वा मां दयालुः पिनाकी
देवस्त्राता त्रायतामप्रयच्छन् ॥ १०७॥ ऋ. १.७.२४
इत्युक्त्वान्ते यत्समाधेर्नमन्तो (यत्समाधेर्न मन्त्रो)
रुद्राद्यास्त्वां यान्ति जन्माहिदष्टाः । (रुद्रं ध्यात्वा)
सन्तो नीलग्रीवसूत्रात्मनाहं (नीलग्रीवमन्त्रात्मनाहं)
तत्त्वायामि ब्रह्मणां वन्दमानः ॥ १०८॥ ऋ. १.२.१५
भवातिभीषणज्वरेण पीडितान् महाभयान-
शेषपातकालयानदूरकाललोचनान् ।
अनाथनाथ ते करेण भेषजेन कालहन्नु-
दूषणो वसो महे मृशस्व शूर राधसे ॥ १०९॥ ऋ. ६.५.९
जयेम येन सर्वमेतदिष्टमष्टदिग्गजं
भुवः स्थलं नभः स्थलं दिवःस्थलं च तद्गतम् ।
य एष सर्वदेवदानवानतः सभापतिः
स नो ददातु तं रयिं रयिं पिशङ्गसदृशम् ॥ ११०॥ ऋ. ८.८.१० (पिशङ्गसन्धृतं)
नमो भवाय ते हराय भूतिभासितोरसे
नमो मृडाय ते हराय भूतभीतिभङ्गिने ।
(नमो भवारये भवार्तिभीतिभङ्गदायिने ।)
नमश्शिवाय विश्वरूपशाश्वताय शूलिने
न यस्य हन्यते सखा न जीयते कदाचन ॥ १११॥ ऋ. ८.८.१०
सुरपतिपतये नमो नमः
क्षितिपतिपतये नमो नमः प्रजापतिपतये ।
नमो नमोऽम्बिकापतये
उमापतये पशुपतये नमो नमः ॥ ११२॥ य. ११.१०.२२
विनायकं वन्दनमस्तकाहति-
प्रणामसङ्घुष्टसमस्तविष्टपम् ।
नमामि नित्यं प्रणतार्तिनाशनं

कविं कवीनामुपमश्रवस्तमम् ॥ ११३॥ ऋ. २.६.२६
देवा युद्धे यागे विप्राः
स्वीयां सिद्धिं ह्वायन् ह्वायन् । (ह्वायं ह्वायम्)
यं सिद्ध्यन्ति स्कन्दं वन्दे
सुब्रह्मण्यो३ं सुब्रह्मण्योम् ॥ ११४॥ य. ११.१.१२.३
नमश्शिवायै जगदम्बिकायै
शिवप्रियायै शिवविग्रहायै ।
समुद्बभूवाद्रिपतेस्सुतायै
चतुष्कवर्दायुवतिस्सुपेशाः ॥ ११५॥ ऋ. ८.६.१६ (चतुष्कपर्दा)
हिरण्यवर्णां मणिनूपुराङ्घ्रिं
प्रसन्नवक्त्रांशुकपद्महस्ताम् ।
विशालनेत्रां प्रणमामि गौरीं
वचो विदं वाचमुदीरयन्तीम् ॥ ११६॥ ऋ. ६.७.८
नमामि मेनातनयाममेया-
मुमामिमां मानवतीं च मान्याम् ।
करोति या भूतिसितौ स्तनौ द्वौ
प्रियं सखायं परिषस्वजाना ॥ ११७॥ ऋ ५.१.१९
कान्तामुमाकान्त नितान्तकान्ति- (कान्तामिमां कान्त)
भ्रान्तामुपान्तानतहर्यजेन्द्राम् । (भ्रान्तामुमां तां)
नतोस्मियास्ते गिरिशस्य पार्श्वे (नकोस्मियास्ते)
विश्वानि देवी भुवनाभिचक्ष्या ॥ ११८॥ ऋ. १.६.२५
वन्दे गौरीं तुङ्गपीनस्तनीं त्वां (तां)
चन्द्राचूडां श्लिष्टसर्वाङ्गरागाम् । (चन्द्रापीडां मृष्टसर्वाङ्गरागाम्)
एषा देवी प्राणिनामन्तरात्मा
देवं देवं राधसे चोदयन्तीम् ॥ ११९॥ ऋ. ५.५.२६
एनां वन्दे दीनरक्षाविनोदा-
मेनां कन्यामानतानन्ददात्रीम् ।
या विद्यानां मङ्लानां च वाचा-
मेषा नेत्री राधसस्सूनृतानाम् ॥ १२०॥ ऋ. ५.५.२३
भवाभिभीतोरुभयापहन्त्रि (भवानुभूतोरुभयापहन्त्रीं)
भवानि भोग्याभरणैकभोगैः । (भवानुभागाभरणैकभोगी)

श्रियं परां देहि शिवप्रिये नो (मे)
ययाति विश्वा दुरिता तरेम ॥ १२१॥ ऋ. ६.३.२८
शिवे कथं त्वं स्तुतिभिस्तु गीयसे (मतिभिस्तु)
जगत्त्रयी केलिरयं शिवः पतिः । (जगत्कृतिः)
हरिस्तु दासोऽनुचरेन्दिरा शची
सरस्वती वा सुभगाददिर्वसु ॥ १२२॥ ऋ. ६.२.४
इमं स्तवं जैमिनिना प्रचोदितं (समीरितं)
द्विजोत्तमो यः पठतीशभक्तितः ।
तमिष्टवाक्सिद्धिमतिश्रियः परं (तमिष्टवाक्सिद्धिमतिद्युतिश्रियः)
परिष्वजन्ते जनयो यथामतिम् ॥ १२३॥ ऋ. ७.८.२४
महीपतिर्यस्तु युयुत्सुरादरा-
दिदं पठत्याशु तथैव सादरात् ।
(महीपतिर्यस्तु युयुत्सुरादरादिमं
पठत्यस्य तथैव सुन्दरम् ।)
प्रयान्ति वा शीघ्रमथान्तकान्तिकं (शीघ्रमथान्तकं)
भियं परं दधाना हृदयेषु शत्रवः ॥ १२४॥ ऋ. ८.३.१९
त्रैवर्णिकेष्वन्यतमो य एनं
नित्यं कदाचित् पठतीशभक्तितः ।
कलेवरान्ते शिवपार्श्ववर्ती
निरञ्जनः साम्यमुपैति दिव्यम् ॥ १२५॥ मुण्डकोपनिषदि. ५०
लभन्ते पठन्तो मतिं बुद्धिकामा
लभन्ते चिरायुस्तथाऽऽयुष्यकामाः ।
लभन्ते तथैव श्रियं पुष्टिकामा (लभन्ते पठन्तः श्रियं)
लभन्ते ह पुत्राँल्लभन्ते ह पौत्रान् ॥ १२६॥ ऋ. ९.१०
सूत उवाच -
इत्यनेन स्तवेनेशं स्तुत्वासौ जैमिनिर्मुनिः ।
स्नेहाश्रुपूर्णनयनः प्रणनाम सभापतिम् ॥ १२७॥

मुहुर्मुहुः पिबन्नीश-ताण्डवामृतमागलम् ।
सर्वान् कामानवाप्यान्ते गाणपत्यमवाप सः ॥ १२८॥

पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
यस्तु वाचयते नित्यं समोक्षमधिगच्छति ॥ १२९॥

वेदः शिवः शिवो वेदो वेदाध्यायी सदाशिवः ।
तस्मात्सर्वप्रयत्नेन वेदाध्यायिनमर्चयेत् ॥ १३० ॥

अधीतविस्मृतो वेदो वेदपादस्तवं पठन् ।
स चतुर्वेदसाहस्रपारायणफलं लभेत् ॥ १३१ ॥

कृपासमुद्रं सुमुखं त्रिनेत्रं
जटाधरं पार्वतिवामभागम् ।
सदाशिवं रुद्रमनन्तरूपं
विश्वेश्वरं त्वां हृदि भावयामि ॥ १३२ ॥

आनन्दनृत्यसमये नटनायकस्य
पादारविन्दमणिनूपुरशिञ्जितानि ।
आनन्दयन्ति मदयन्ति विमोहयन्ति
रोमाञ्चयन्ति नयनानि कृतार्थयन्ति ॥ १३३ ॥

अतिभीषण-कटुभाषण-यमकिङ्कर-पटली-
कृतताडन-परिपीडन-मरणागम-समये ।
उमया सह मम चेतसि यम-शासन-निवसन्
हर शङ्कर शिव शङ्कर हर मे हर दुरितम् ॥ १३४ ॥

इति श्रीजैमिनिमहर्षिणा प्रणीतो वेदपादस्तवस्सम्पूर्णः ।
(इति जैमिनिकृत-वेदपादस्तोत्रं सम्पूर्णम् ।)
शुभम् ॥

Proofread by Aruna Narayanan

*Shri Shiva Vedapadastava or Shiva Vedapadastotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*